नम्। "अन्यार्थधीकृत् व्याप्टतिरञ्जनम्" का०प्र०। कर्त्तरि ल्यु। व्यञ्जना एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रयेति" सा०द०।

**अन्त** न० अम–तन्। स्वरूपे, स्वभावे च। शेषे पु०न०। नाशे, सीमायां, निश्चये, शेषावयवे च पु०। निकटे, मनोहरे च त्रि०। तत्र स्वरूपे "मृदुलतान्तलतान्तमलोकयदिति" माघः। नाशे "पतत्यविरतं वारि नृत्यन्ति शिखिनो मुदा। "अद्य कान्तः कृतान्तो वा दुःखस्यान्तं करिष्यतीति" उद्भटः। "वैरस्यान्तं करिष्यति" रामा०। सीमायां 'वनान्तपर्य्यन्तमुपेत्य सस्पृहमिति" नैष०। "ओदकान्तात् स्निग्धोऽनुगन्तव्य" इति श्रुतिः। सीमाऽवधिः स च दैशिकः कालिकश्च। तत्र दैशिक उक्तोदाहरणे कालिकस्तु। "पक्षान्ते निष्फला यात्रा मासान्ते मरणं ध्रुवमिति" ज्योति०। 'दशाहान्ते पुनः क्रियेति" स्मृतिः शेषसीमायाम् "अमुं वनान्ताद्वनितवहारिणमिति" माघः। "दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिन" इति भामिनी०। "गङ्गाप्रपातान्तविरूढ़शष्पमिति" रघुः। शेषावयवे "नेत्रान्तमुद्वीक्षते" इति वेदान्त इत्यादि। निश्चये। "उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिरिति" गीता। उभयोः सदसतोरित्यर्थः। निकटे अन्तपालः। स्वभावे शुद्धान्तः। शेषे निशान्तः।

**अन्तःकरण** न० कृ-करणे ल्युट् अन्तरभ्यन्तरस्थं करणं, कर्म्म०, तद्वृत्तिपदार्थानां सुखादीनां करणं ज्ञानसाधनं ६त० वा। ज्ञानसुखादिसाधने आभ्यन्तरे मनोबुद्धिचित्तादिपदाभिलप्यमाने इन्द्रिये। तच्चान्तःकरणम् वेदान्तिमते चतुर्विधम्। "मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरम्। संशयो निश्चयो गर्वः स्मरणं विषया इमे" इत्युक्तकार्य्यभेदात्। अन्यत्र व्यक्तमुक्तम् "यदा तु संकल्पविकल्पकृत्यं तदा भवेत्तन्मन इत्यभिख्यम्। स्याद्बुद्धिसंज्ञं च यदा तु वेत्ति सुनिश्चितं संशयरूपहीनम्। अनुसन्धानरूपं तच्चित्तञ्च परिकीर्त्तितम्। अहंकृत्यात्मवृत्त्या तु तदहङ्कारतां गतमिति"। एतदनुसारेणैव शारदायामुक्तम् "अन्तःकरणमात्मनः। मनोबुद्धिरहङ्कारश्चित्तञ्चेति प्रकीर्त्तितमिति"। तस्य च ज्ञानादिप्रत्यक्षकरणत्वादन्तःकरणत्वम्। तत्साधकमनुमानञ्चेत्थम् ज्ञानसुखादिप्रत्यक्षं स्वग्राहकेन्द्रियसापेक्षं प्रत्यक्षत्वात् रूपादिप्रत्यक्षवत्। नच चक्षुरादीनां तत्करणत्वं सम्भवति रूपादित्वाभावादित्यन्तःकरणसिद्धिरिति नैयायिकादयः। सांख्यादयस्तु महत्तत्त्वापरपर्य्यायमेवान्तःकरणमङ्गीचक्रुः। पञ्चतन्मात्रेभ्यो भूतेभ्यश्चाहङ्काररूपद्रव्यसिद्धिमुक्त्वा "तेनाऽन्तःकरणस्येति" सां०सू० तत्सिद्धिरुक्ता तदनुमाने च भाष्ये एवं प्रयोगादिकं दर्शितम्। "अहङ्कारद्रव्यं निश्चयवृत्तिमद्द्रव्योपादानकं निश्चयकार्यद्रव्यत्वात् यन्नैवं तन्नैवं यथा पुरुषादिरिति। अत्राप्ययं तर्कः, सर्वोऽपि लोकः पदार्थमादौ स्वरूपतो निश्चित्य पश्चादभिमन्यते अयमहं, मयेदं कर्त्तव्यमित्यादिरूपेणेति, तावत् सिद्धमेव। तत्राहङ्कारद्रव्यकारणाकाङ्क्षायां वृत्त्योः कार्यकारणभावेन तदाश्रययोरेव कार्यकारणभावो लाघवात् कल्प्यते कारणस्य वृत्तिलाभेन कार्यवृत्तिलाभस्यौत्सर्गिकत्वादिति। यद्यपि अन्तःकरणमेकं तथापि वंशपर्वस्विवावान्तरभेदमाश्रित्यान्तःकरणत्रये क्रमः, कार्यकारणभावश्चोक्तः योगोपयोगिश्रुतिस्मृतिपरिभाषानुसारादिति मन्तव्यम्। तदुक्तं वाशिष्ठे। "अहमर्थोदयो योऽयं चित्तात्मा वेदनात्मकः। एतच्चित्तद्रुमस्यास्य बीजं विद्धि महामते!॥ एतस्मात् प्रथमोद्भिन्नादङ्कुरोऽभिनवाकृतिः। निश्चयात्मा निराकारो बुद्धिरित्यभिधीयते॥ अस्य बुद्ध्यभिधानस्य याङ्कुरस्य प्रपीनता। सङ्कल्परूपिणी तस्याश्चित्तचेतोमनोभिधा" इति। अहमर्थोऽन्तःकरणसामान्यम्। अत्र वाक्ये बीजाङ्कुरन्यायेनैकस्यैवान्तःकरणवृत्तस्य वृत्तिमात्ररूपेण चित्ताद्यवस्थाभेदाः क्रमिकास्त्रिविधाः परिणामा उक्ता इति। साङ्ख्यशास्त्रे च चिन्तनावृत्तिकस्य चित्तस्य बुद्धावेवान्तर्भावः। अहङ्कारस्य चात्र वाक्ये बुद्धावन्तर्भावः" इति॥ कारिकायामपि "अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यमिति" त्रैविध्यमुक्त्वा "सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्, तस्मात्त्रिविधं करणं द्वारि, द्वाराणि शेषाणीति" तत्त्रयस्यैव प्राधान्यमुक्तम्। एवञ्च पुरुषस्य सन्निधिमात्रादधिष्ठातृत्वं गौणं मुख्यमधिष्ठातृत्वन्तु अन्तःकरणस्यैव यथोक्तम् "अन्तःकरणस्य तदुज्ज्वलितत्वाल्लौहवदधिष्ठातृत्वम्" सां०सू०॥ "अन्तःकरणस्यानुपचरितमधिष्ठातृत्वं सङ्कल्पादिद्वारकं प्रत्येतव्यम्। नन्वधिष्ठातृत्वं घटादिवदचेतनस्य न युक्तं तत्राह। लौहवत् तदुज्ज्वलितत्वादिति। अन्तःकरणं हि तप्तलौहवच्चेतनोज्ज्वलितं भवति। अतस्तस्य चेतनायमानतयाधिष्ठातृत्वं घटादिव्यावृत्तमुपपद्यत इत्यर्थः। नन्वेवं चैतन्येनान्तःकरणस्योज्ज्वलने चितेः सङ्गित्वमग्निवदेव स्यादिति चेन्न नित्योज्ज्वलचैतन्यसंयोगविशेषमात्रस्य संयोगविशेष